
विद्यार्थियों के लिए परीक्षा की दृष्टि से उपयोगी

# वन लाइनर

## कक्षा - 10वीं

सत्र 2024-25



## संस्कृत

लोक शिक्षण संचालनालय, भोपाल (म.प्र.)

# सौरभसंस्कृतम्

## प्रथमः पाठः

- अत्र जीवितं ‘दुर्वहम्’ जातम्।
- अनिशं महानगरमध्ये 'कालयसचक्रम्' प्रचलति।
- कुत्सितवस्तुमिश्रितं भक्ष्यम्।
- अहं **मानवाय** जीवनं कामये।
- **हरिततरुणां ललितलतानाम्** माला रमणीया।
- अत्र धरातले जीवितं दुर्वहं जातम् अत: कवि: प्रकृते: शरणम् इच्छति।
- कवि: एकान्ते कान्तारे क्षणमपि सञ्चरणं कर्तुम् इच्छति।
- मार्गेषु यानानाम् अनन्ता: पङ्क्तय: धावन्ति एतस्मात् कारणात् महानगरेषु संसरणं कठिनं वर्तते।
- अस्माकं पर्यावरणे वायुमण्डलं, जलं, भक्ष्यं धरातलं च दूषितम् अस्ति।
- स्वस्थजीवने स्वच्छवातावरणे भ्रमणणीयम्।
- अन्तिमे पद्यांशे कवे: कामना अस्ति यत् लतातरुगुल्मा प्रस्तरतले पिष्टा: नो भवन्तु। पाषाणी सभ्यता निसर्गे समाविष्टा न स्यात् मानवाय जीवनं भवेत् जीवन्मरणम् न इति।
- इदानीं वायुमण्डलं **भृशम्** प्रदूषितमस्ति।
- **अत्र** जीवनं दुर्वहम् अस्ति।
- प्राकृतिक-वातावरणे क्षणं सञ्चरणम् **अपि** लाभदायकं भवति।
- पर्यावरणस्य संरक्षणम् **एव** प्रकृते: आराधना।
- **सदा** समयस्य सदुपयोग: करणीय:।
- भूकम्पित-समये **बहि:** गमनमेव उचितं भवति।
- **यत्र** हरितिमा **तत्र** शुचि पर्यावरणम्।
- शकटीयानम् **कज्जलमलिनं** धूमं मुञ्चति (कीदृशं)
- उद्याने **पक्षिणां** कलरवं चेत: प्रसादयति। (केषां)
- पाषाणीसभ्यतायां **लतातरुगुल्मा:** प्रस्तरतले पिष्टा : सन्ति (के)
- **महानगरेषु** वाहनानाम् अनन्ता: पङ्क्तय: धावन्ति। (कुत्र)
- **प्रकृत्या:** सन्निधौ वास्तविकं सुखं विद्यते। (कस्या:)

## द्वितीय: पाठ:

- बुद्धिमती **गहनकानने** व्याघ्रं ददर्श।
- भामिनी **निजबुद्ध्या** विमुक्ता।
- सर्वदा सर्वकार्येषु **बुद्धि:** बलवती।
- व्याघ्र: **मानुषात्** विभेति।
- बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
- व्याघ्र: व्याघ्रमारी काचित् इयम् इति **विचार्य** पलायित:।
- लोके महतो भयात् बुद्धिमान् मुच्यते।
- तत्र **राजसिंहो** नाम राजपुत्र: वसति स्म। (क:)
- बुद्धिमती **चपेटया** पुत्रौ प्रहृतवती (कया)
- **व्याघ्रं** दृष्ट्वा धूर्त: श्रृगाल: अवदत्। (कं)
- त्वं **मानुषात्** विभेषि। (कस्मात्)
- उचितं घटनाक्रमलेखनम्
- बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
- मार्गे सा एकं व्याघ्रम् अपश्यत्
- व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।
- व्याघ्र: व्याघ्रमारी इयमिति मत्वा पलायित:।
- जम्बुककृतोत्साह: व्याघ्र: पुन: काननम् आगच्छत्।
- प्रत्युत्पन्नमति: सा श्रृगालं आक्षिपन्ती उवाच।
- 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान्।
- गलबद्ध श्रृगालक: व्याघ्र: पुन: पलायित:।

## तृतीय: पाठ:

- कुशलवौ **'रामम्'** उपसृत्य प्रणमत:।
- तपोवनवासिन: कुशस्य मातरं **'देवीति'** नाम्ना आह्वयन्ति।
- वयोऽनुरोधात् **'शिशु:'** लालनीय: भवति।
- **'उपनयनोपदेशेन'** वाल्मीकि: लवकुशयो: गुरू:।
- **'तपोवने'** लवकुशयो: पितु: नाम न व्यवह्रियते।
- रामाय कुशलवयो: काण्ठाश्लेषस्य स्पर्श: **'हृदयग्राही'** आसीत्।

- राम: लवकुशौ 'सिंहासने' उपवेशयितुम् कथयति।
- बालभावात् हिमकर: 'पशुपति-मस्तक-केतकच्छदत्वम्' विराजते।
- कुशलवयो: वंशस्य कर्ता 'भगवान् सहस्त्रदीधिति:'।
- कुशलवयो: मातरं वाल्मीकि: 'वधूरिति नाम्ना' **आह्वयति**।
- सव्यवधानं न चारित्र्यलोपाय। राम: - लवकुशौ
- किं कुपिता एवं भणति, उत प्रकृतिस्था विदूषक: - कुशम्
- जानाम्यहं तस्य नामधेयम।  कुश: - रामम्
- तस्या द्वे नाम्नी  लव: - विदूषकम्
- वयस्य ! अपूर्वं खलु नामधेयम्।  राम: - विदूषकम्

## चतुर्थ: पाठ:

- वृषभ: दीन: इति जानन्नपि **'कृषक:'** तं नुद्यमान: आसीत्।
- वृषभ: **क्षेत्रे** पतात।
- दुर्बले सुते **'मातु:'** अधिका कृपा भवति।
- **'वलीवर्दयो:'** एक: शरीरेण दुर्बल: आसीत्।
- चण्डवातेन मेघरवैश्च सह **'प्रवर्ष:'** समजाय।
- कृषक: 'वलीवर्दाभ्यांक्षेत्रकर्षणं' करोति स्म।
- माता सुरभि: भूमौ पतिते स्वपुत्रं दृष्ट्वा अश्रूणि मुञ्चति स्म।
- सुरभि इन्द्रस्य प्रश्नस्य उत्तरं ददाति यत ''हे वासव ! अहं। पुत्रस्य दैन्यं दृष्ट्वा रोदिमि'' इति।
- मातु: अधिका कृण 'दुर्बले सुते' भवति।
- जननी 'तुल्यवत्सला' भवति।
- स **कृच्छ्रेण** भारम् उद्वहति। (कथं)
- **सुराधिप:** ताम् अपृच्छत्। (क:)
- अयम् **अन्येभ्यो** दुर्बल:। (केभ्यो)
- **धेनूनाम्** माता सुरभि: आसीत्। (कासाम्)
- **सहस्त्राधिकेषु** पुत्रेषु सत्स्ववपि सा दु:खी आसीत्। (कतिषु)

## पञ्चम: पाठ:

- मनुष्याणां महान् रिपु: **‘आलस्यम्’** ।
- गुणी **‘गुणं’** वेन्ति ।
- **‘महताम्’** सम्पत्तौ च विपत्तौ च एकरूपता ।
- पशुना अपि **‘उदीरितोऽर्थ:’** गृह्यते ।
- उदयेसमये अस्तसमये च **‘सविता’** रक्त: भवति ।
- **‘उद्यमेन’** सम: बन्धु: नास्ति ।
- वसन्तस्य गुणं पिक: जानाति ।
- बुद्धय: ‘परेङ्गितज्ञानफला:’ भवन्ति ।
- नराणां प्रथम: शत्रु: क्रोध: ।
- सुधिय: सख्यं सुधिभि: सह भवति ।
- अस्माभि: ‘फलच्छायासमन्वित:’ महावृक्ष: सेवितव्य: ।

## षष्ठ: पाठ:

- वनराज: **‘‘तुच्छजीवै:’’** दुरवस्थां प्राप्त:
- **‘‘काक:’’** वातावरणं कर्कशध्वनिना आकुली करोति ।
- काकचेष्ट:, वकोध्यानम्, श्वान निद्रा चेति विद्यार्थी **‘‘आदर्श:’’** छात्र: मन्यते ।
- **‘‘गज:’’** आत्मनं, बलशानिलनं, विशालकायं पराक्रमिणं च कथयति ।
- बक: **‘‘वराकान्’’** मीनान् क्रूरतया भक्षयति ।
- य: सदा परै: वित्रस्तान् पीड्यमानान् जन्तुन न रक्षति स: पार्थिव रूपेण नि:संशयं कृतान्त: मन्यते ।
- बक: वन्यजन्तूनां रक्षोपायान् शीतले जले बहुकालपर्यन्तम् अविचल: ध्यानमग्न: स्थितप्रज्ञ इव स्थित्वा चिन्तायितुम् कथयति ।
- यदि राजा सम्यक् न भवति तदा प्रजा जलधौ अकर्णधारा नौ इव विप्लवते ।
- मयूर: ‘‘पिच्छानुद्घाट्य’’ नृत्यमुद्रायां स्थित: भवति ।
- अन्तेसर्वे मिलित्वा ‘‘उलूकस्य’’ राज्याभिषेकाय तत्परा: भवन्ति ।
- अस्मिन्नाटके ‘‘द्वादश’’ पात्राणि सन्ति ।
- सिंह: वानराभ्यां **स्वरक्षायां** असमर्थ: एव आसीत् । (किमर्थं)
- गज: वन्यपशून् तुदन्तं **शुण्डेन** पोथयित्वा मारयति । (केन)
- वानर: आत्मानं **वनराजपदाय** योग्य: मन्यते । (कस्मै)

- मयूरस्य नृत्यं **प्रकृतेः** आराधना। (कस्याः)
- सर्वे **प्रकृतिमातरं** प्रणमन्ति। (कां)
- का-का इति काकस्य ध्वनि भवति बकस्य न।
- काकपिकयोः वर्णः कृष्णः भवति।
- काकः **मेध्यामेध्य भक्षकः** भवति।
- **पिकः** परभृत् अपि कथ्यते।
- बकः अविचलः **स्थितप्रज्ञः** इव तिष्ठति।
- मयूरः **अहिभुक्** इति नाम्नाऽपि ज्ञायते।
- **यथा समयम्** सर्वेषाम् एव महत्वं विद्यते।
- बसन्त समय प्राप्ते काकः काकः पिकः पिकः भवति।

## सप्तमः पाठः

- ''**विजने** प्रदेशे'' पदयात्रा न सुखावहा।
- अतिथिः ''**पादध्वनिना**'' प्रबुद्धः।
- कृशकायः ''**अभियुक्तः**'' आसीतं्।
- न्यायाधीशः ''आरक्षिणे'' कारागारदण्डम् आदिष्टवान्।
- ''राजमार्गम्'' निकषा मृतशरीरम् आसीत्।
- निर्धनः जनः ''भूरि परिश्रम्य'' वित्तम उपार्जितवान्।
- जनः अर्थकार्श्येन पीडितः ''वसयानम् विहाय'' पदातिः गच्छति।
- प्रसृते निशान्धकारे ''विजने प्रदेशे'' पद यात्रा न शुभावहा इति सः अचिन्तयत्।
- वस्तुतः चौरः ''आरक्षी'' आसीत्।
- मतिवैभवशालिनः दुष्कराणि कार्याणि ''नीतिं युक्तं'' च समालम्ब्य लीलया एव साधयन्ति।
- **पुत्रं** द्रष्टुं सः प्रस्थितः। (कं)
- करुणापरो गृही **तस्मै** आश्रयं प्रायच्छत्। (कस्मै)
- न्यायाधीशः बंकिमचन्द्रः आसीत्। (कः)
- स **भारवेदनया** क्रन्दति स्म। (कया)
- उभौ शवं **चत्वरे** स्थापितवन्तौ। (कुत्र)
- **चौरस्य** पादध्वनिना अतिथिः प्रबुद्धः (कस्य)

## अष्टम: पाठ:

- पिता पुत्राय बाल्ये **''विद्याधनं''** यच्छति।
- विमूढधी: **''धर्मप्रदां''** वाचं परित्यजति।
- अस्मिन् लोके ''विद्वांस'' एव चक्षुष्मन्त: प्रकीर्तिता:।
- ''प्राणेभ्योऽपि'' सदाचार: रक्षणीय:।
- आत्मन: श्रेय: इच्छन् नर: **अहितम्** कर्म न कुर्यात्।
- वाचि **''अवक्रता''** भवेत्।
- संसारे **विद्वांस:** ज्ञानचक्षुर्भि: नेत्रवन्त: कथ्यन्ते। (के)
- जनकेन **सुताय** शैशवे विद्याधनं दीयते। (कस्मै)
- **तत्वार्थस्य** निर्णय: विवेकेन कर्तुं शक्य:। (कस्य)
- धैर्यवान् **लोके** परिभवं न प्राप्नोति। (कुत्र)
- आत्म कल्याणम् इच्छन् नर: **परेषाम्** अनिष्टं न कुर्यात्। (केषाम्)

## नवम: पाठ:

- **''भूकम्पस्य''** दारुण - विभीषिका गुर्जरक्षेत्रं ध्वांसावशेषेषु परिवर्तितवती।
- **''बहुभूमानि''** भवनानि क्षणेमैव धराशायीनि जातानि। उत्खा विद्युत स्तम्भा :। अत: बहुभूमिक भवन निर्माणं न करणीयम्।
- दुर्वार- जलधाराभि: ''महाप्लावनदृश्यम्'' उपस्थितम्।
- ''भूकम्पस्य'' उपशमनस्य स्थिरोपाय: नास्ति।
- ''विवशा:'' प्राणिन: भूकम्पेन निहन्यन्ते।
- समस्त राष्ट्रं नृत्य गीतवादि त्राणाम् उल्लासे मग्नम् आसीत्।
- भूकम्पस्य केन्द्र बिन्दु: कच्छजनपद: आसीत्।
- पृथिव्या: स्खलनात् भूकम्पनं जायते।
- समग्रं विश्वं भूकम्पै: आतिङ्कित: दृश्यते।
- ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते।
- भूकम्पविभीषिका विशेषेण कच्छजनपदं **ध्वंसावशेषेषु** परिवर्तितवती। (केषु)
- **वैज्ञानिका:** कथयन्ति यत् पृथिव्या: अन्तर्गर्भे, पाषाणशिलानां संघर्षणेन कम्पनं जायते। (के:)
- विवशा: प्राणिन: **आकाशे** पिपीलिका: इव निध्न्यन्ते। (कुत्र)
- **एतादृशी** भयावह घटना गढ़वालक्षेत्रे घटिता। (कीदृशी)
- तदिदानीम् **भूकम्पकारणं** विचारणीयं तिष्ठति। (किम्-किम्)

## दशम: पाठ:

- **''सरस:** शोभा एकेन राजहंसेन'' भवति।
- सरस: तीरे बका: वसन्ति।
- **''चातक:''** पिपासित: म्रियते। चातक: पुरन्दरम् याचते।
- **''भृङ्गा:''** रसालमुकुलानि समाश्रयन्ते।
- अम्भोदा: **''गगने''** सन्ति।
- ''नानानदीनदशतानि'' पूरयित्वा जलद: रिक्त: भवति।
- वृष्टिभि: वसुधाम् ''अम्भोदा:'' आर्द्रयन्ति।
- मालाकार: **तोयै:** तरो: पुष्टिं करोति। (कै:)
- भृङ्गा: **रसालमुकुलानि** समाश्रयन्ते। (कानि)
- **पतङ्गा:** अम्बरपथम् आपोदिरे। (के)
- **जलद:** नानानदीनदशतानि पूरयित्वारिक्तोऽस्ति। (क:)
- चातक: **वने** वसति। (कुत्र)
- सरस: शोभा **एकेन राजहंसेन** भवति।
- यदा सर: संकोचम् अञ्चति तदा मीन: दीनां गतिं प्राप्नोति ।

| पदानि | विलोमपदानि | पदानि | विलोमपदानि |
|---|---|---|---|
| • सुकरम् | दुर्वहम् | • प्रसीदति | प्रकुप्यति |
| • दूषितम् | शुद्धम् | • मूर्ख: | पण्डित: |
| • निर्मलम् | समलम् | • बली | निर्बल: |
| • दानवाय | मानवाय | • सुलभ: | दुर्लभ: |
| • सान्ता: | अनन्ता: | • संपत्तौ | विपत्तौ |
| • प्रथम: | द्वितीय: | • अस्तमये | उदये |
| • उक्त्वा | श्रुत्वा | • साार्थकम् | निरर्थकम् |
| • अधुना | पुरा | • पक्व: | अपक्व: |
| • अवेला | वेला | • विमूढधी: | सुधी: |
| • बुद्धिहीना | बुद्धिमती | • कातर: | अकातर: |
| | | • कृतज्ञता | कृतघ्नता |
| | | • आलस्यम् | उद्योग: |
| | | • परुषा | कोमला |
| | | • सम्पन्नम् | विपन्नम् |
| | | • ध्वस्तभवनेषु | नवनिर्मितभवनेषु |
| | | • निस्सरन्तीभि: | प्रविशन्तिभि: |
| | | • निर्माय | विनाश्य |
| | | • क्षणेनैव | सुचिरेणैव |

# पर्यायपदानि

| पदं | | पर्यायपदं |
|---|---|---|
| • सलिलम् | - | जलम, नीरम, अम्बू: |
| • आश्रम् | - | रसालम् |
| • वनम् | - | कान्तारम्, अरण्डम्, काननम् |
| • शरीरम् | - | तनु:, देह, वपु: |
| • कुटिलम् | - | वक्रम् |
| • पाषाण: | - | प्रस्तर:, शैल: |
| • शृंगाल: | - | जम्बुक: |
| • शीघ्रम् | - | सत्वरम्, त्वरितम् |
| • पत्नी | - | भार्या |
| • गच्छसि | - | यासि |
| • हिमकर: | - | शशि:, निशाकर:, चन्द्र: |
| • सम्प्रति | - | इदानीम्, अधुना |
| • समुदाचार: | - | सदाचार:, शिष्टाचार: |
| • पशुपति: | - | शिव:, चन्द्रशेखर: |
| • तनय: | - | पुत्र:, सुत: |
| • सहस्रदीछिति: | - | भानु:, सूर्य:, सविता, दिवाकर:, भास्कर: |
| • शत्रु: | - | रिपु:, अरि: |
| • मित्रम् | - | सखा, बन्धु:, सुहृद् |
| • सुधिय: | - | विद्वांस:, विज्ञा: |
| • वह्नि: | - | अग्नि:, अनल:, पावक: |
| • अश्व: | - | तुरग:, हय:, घोटक: |
| • गज: | - | करी, हस्ती, दन्ती, नाग:, कुञ्जर: |
| • वृक्ष: | - | द्रुम:, तरु:, महीरुह:, विटप:, पादप: |
| • काक: | - | वायस: |
| • पिक: | - | कोकिला, परभृत् |
| • भूरि | - | पर्याप्तम्, बहु, विपुलम्, प्रभूतम |
| • शुभावहा | - | कल्याणप्रदा |
| • कृशकाय: | - | दुर्बलं शरीरम् |

- मुदित: - प्रसन्न:
- विमूदधी: - मूर्ख:, बुद्धिहीन:
- श्रेय: - शुभम्, शिव, कल्याणम्
- चित्तम् - मन:, चेत:, मानसम्
- सभा - संसद, परिषद्
- चक्षुष् - नैत्रम, लोचनम्, नयनम्
- मुखम् - आननम्, वक्त्रम्, वदनम्
- दारुण - भयङ्कर

- द्वितीयाविभक्ते एकवचनं रूपाणि - रामम् रमाम्, लताम्, बालकम्, फलम् पुस्तकम, माम, त्वाम, तम्, बालिकाम्, नदीम्
- द्वितीयाविभक्ते: बहुवचनं रूपाणि - रामान्, बालकान्, रमा:, लता:, फलानि, अस्मान्, युष्मान्, तान्, नदी:
- तृतीयाविभक्ते: एकवचनं रूपाणि - रामेण, रमया, बालकेन, लतया फलेन, मया, त्वया, तेन, गीतया
- चतुर्थीविभक्ते: एकवचनं रूपाणि - रामाय, शिवाय, गणेशाय, गुरवे, हनुमते, रमायै, लतायै, फलाय, तुभ्यम्, मह्यम, तस्मै
- पञ्चमीविभक्ते: एकवचनं रूपाणि - रामात्, रमाया:, बालकात्, लताया: मत् त्वंत् फलात् तस्मात्
- षष्ठीविभक्ते: एकवचनं रूपाणि - रामस्य, बालकस्य, रमाया:, लताया:, फलस्य, मम्, तव तस्प
- षष्ठीविभक्ते बहुवचन रूपाणि - रामणाम्, रमाणाम्, बालकानाम्, फलानाम्, अस्माकम्, युष्माकम्, तेषाम्, तासाम्
- सप्तमीविभक्ते: एकवचनं रूपाणि - रामे, रमायम्, लतायाम् फले मयि, त्वयि तस्मिन् तस्याम्
- अव्ययानां नामानि - अत्र:, तत्र, कुत्र, अन्यत्र, सर्वत्र, च, एव, इव, अपि, मा, खलु, शनै:, शनै:, इदानी, साम्प्रतम्, अथ, यथा, तथा, एकदा, अधुना, प्रति अद्य, श्व:, सहसा, विना, सह, अलम, पुन:, तदा, कदा, यदा, खलु, आम्, इति, तर्हि

- गचछति, गच्छत:, गच्छन्ति इति पदेषु ''गम्'' धातु: प्रथम पुरुषस्य त्रिषु वचनेषु लट्लकारे रुपाणि भवन्ति।
- पिबसि-पिबथ:-पिबथ इति पदेषु - ''पा'' धातु: मध्यमपुरुषस्यत्रिषु वचनेषु लट्लकारे रूपाणि भवन्ति।
- पश्यामि - पश्याव:- पश्याम: इति पदेषु ''दृश्'' धातु: उत्तमपुरुषस्य त्रिषु वचनेषु लट्लकारे रुपाणि भवति।
- भविष्यति -भविष्यत: - भविष्यन्ति इति पदेषु - ''भू'' धातु: प्रथम पुरुषस्य लृट्लकारे रूपाणि भवन्ति।

- गमिष्यसि- गमिष्यथ: - गमिष्यथ इति पदेषु ''गम्'' धातु: मध्यमपुरुषस्य लृट्लकारे रूपाणि भवन्ति।
- पठिष्यामि-पठिष्याव:-पठिष्याम: इति पदेषु - ''पठ'' धातु: उत्तम्पुरुषस्य लृट् लकारे रूपाणि भवन्ति।
- लट्लकारस्य प्रयोग: वर्तमान काले भवति।
- लृट्लकारस्य प्रयोग: भविष्य काले भवति।

| सन्धिपदम् | | सन्धिविच्छेद: | | सन्धिनाम |
|---|---|---|---|---|
| विद्यालय: | = | विद्या+आलय: | = | दीर्घसन्धि: |
| गणेश: | = | गण+ईश: | = | गुण सन्धि: |
| पितुर्गहम् | = | पितु:+गृहम् | = | विसर्ग सन्धि: |
| एकैक: | = | एक+एक: | = | वृद्धि सन्धि: |
| अन्योऽपि | = | अन्य:+अपि | = | विसर्ग सन्धि: |
| इत्युक्त्वा | = | इति+उक्त्वा | = | यण् सन्धि: |
| यत्रास्ते | = | यत्र+आस्ते | = | दीर्घ सन्धि: |
| प्रकृतिरेव | = | प्रकृति:+एव | = | विसर्ग सन्धि: |
| स्यान्नैव | = | स्यात्+नैव | = | व्यञ्जन सन्धि: |
| ह्यनन्ता: | = | हि+अनन्ता: | = | यण् सन्धि: |
| बहिरन्तर्जगति | = | बहि:+अन्त: +जगति | = | विसर्ग सन्धि: |
| अस्मान्नगरात् | = | अस्मात्+नगरात् | = | व्यञ्जन सन्धि: |
| सञ्चरणम् | = | सम्+चरणम् | = | व्यञ्जन सन्धि: |
| धूमंमुञ्चति | = | धूमम्+मुञ्चति | = | व्यञ्जन सन्धि: |
| द्वयोरपि | = | द्वयो:+अपि | = | विसर्ग सन्धि: |
| द्वावपि | = | द्वौ+अपि | = | अयादि सन्धि: |
| कोऽत्र | = | क:+अत्र | = | विसर्ग सन्धि: |
| अनविज्ञोऽहम् | = | अनविज्ञ:+अहम् | = | विसर्ग सन्धि: |
| इत्यात्मानम् | = | इति+आत्मानम् | = | यण् सन्धि: |
| खल्वेतत् | = | खलु+एतत् | = | यण् सन्धि: |
| वयोऽनुरोधात् | = | वय:+अनुरोधात् | = | विसर्ग सन्धि: |
| तयोरेक: | = | तयो:+एक: | = | विसर्ग सन्धि: |
| नोत्थित: | = | न+उत्थित: | = | गुण सन्धि: |
| सत्स्वपि | = | सत्सु+अपि | = | यण सन्धि: |
| हितोपदेश: | = | हित+उपदेश: | = | गुण सन्धि: |
| सूर्योदय: | = | सूर्य+उदय: | = | गुण सन्धि: |
| महोत्सव: | = | महा+उत्सव: | = | गुण सन्धि: |

| सन्धिपदम् | | सन्धिविच्छेद: | | सन्धिनाम |
|---|---|---|---|---|
| महर्षि: | = | महा+ऋषि: | = | गुण सन्धि: |
| नास्ति | = | न+अस्ति | = | दीर्घ सन्धि: |
| गावश्च | = | गाव:+च | = | व्यञ्जन सन्धि: |
| योजकस्तत्र | = | योजक:+तत्र | = | विसर्ग सन्धि: |
| पदातिरेव | = | पदाति:+एव | = | विसर्ग सन्धि: |
| भोजनान्ते | = | भोजन+अन्ते | = | दीर्घ सन्धि: |
| निशान्धकारे | = | निशा+अन्धकारे | = | दीर्घ सन्धि: |
| लीलयैव | = | लीलया+एव | = | वृद्धि सन्धि: |
| यदुक्तम् | = | यत्+उक्तम् | = | व्यञ्जन सन्धि: |
| सहस्रशोऽन्ये | = | सहस्रश: + अन्ये | = | विसर्ग सन्धि: |
| सञ्चय: | = | सम्+चय: | = | व्यञ्जन सन्धि: |
| विचित्रोऽयम् | = | विचित्र:+अयम् | = | विसर्ग सन्धि: |
| निपीतान्यम्बूनि | = | निपीतानि+अम्बूनि | = | यण् सन्धि: |
| कृतोपकार: | = | कृत+उपकार: | = | गुण सन्धि: |
| कोऽपि | = | क:+अपि | = | विसर्ग सन्धि: |
| सोऽपि | = | स:+अपि | = | विसर्ग सन्धि: |
| अन्योक्तय: | = | अन्य+उक्तय: | = | गुण सन्धि: |
| तवोत्तमा | = | तव+उत्तमा | = | गुण सन्धि: |
| नैतादृशा | = | न+एतादृशा | = | वृद्धि सन्धि: |
| सर्वेऽपि | = | सर्वे+अपि | = | पूर्वरूप सन्धि: |

| विशेषणविशेष्यपदानि | विशेषणपदानि - विशेष्यपदानि |
|---|---|
| श्लाध्याकथा | श्लाध्या - कथा |
| उदात्तरम्य: समुदाचार: | उदात्तरम्य: - समुदाचार: |
| अतिदीर्घ: प्रवास: | अतिदीर्घ: - प्रवास: |
| समरूप: कुटुम्बवृत्तान्त: | समरूप: - कुटुम्बवृत्तान्त: |
| हृदयग्राही स्पर्श: | हृदयग्राही - स्पर्श: |
| कुमारयो: लवकुशयो: | कुमारयो: - लवकुशयो: |
| जननी तुल्यवत्सला | तुलयवत्सला - जननी |

| विशेषणविशेष्यपदानि | विशेषणपदानि - विशेष्यपदानि |
|---|---|
| मधुराणि वचनानि | मधुराणि - वचनानि |
| कृष्ण: काक: | कृष्ण: - काक: |
| दुर्बल: वृषभ: | दुर्बल: - वृषभ: |
| विचित्र: साक्षी | विचित्र: - साक्षी |
| गुणी गुणं | गुणी - गुणं |
| बली बलं | बली - बलं |
| सेवितव्य: महावृक्ष: | सेवितव्य: - महावृक्ष: |
| बुद्धिर्बलवती सदा | सदा-बुद्धिर्बलवती |
| शुचिपर्यावरणम् | शुचि - पर्यावरणम् |
| निर्मलं जलम् | निर्मलं-जलम् |

- अपठत् - अपताम् - अपठन् इति पदेषु ''पठ्'' धातु: लङ्लकार प्रथम पुरुषस्य रुपाणि भवन्ति।
- अगच्छ:-अगच्छतम्-अगच्छत इति पदेषु ''गम्'' धातु: लङ्लकार मध्यमपुरुषस्य रूपाणि भवन्ति।
- अपिबम्-अपिबाव-अपिबाम इति पदेषु ''पा'' धातु: लङ्लकार उत्तमपुरुषस्य रूपाणि भवन्ति।

**लङ्लकारस्य प्रयोग: भूतकाले भवति**

- पश्यतु-पश्यताम्-पश्यन्तु इति पदेषु ''दृश्'' धातु: लोट्लकार प्रथम पुरुषस्य रूपाणि भवन्ति।
- पठेत्-पठेताम्-पठेयु: इति पदेषु ''पठ्'' धातु विधिलिङ्गलकार प्रथम पुरुषस्य रूपाणि भवन्ति।
- उपसर्गाणां नामानि-प्रयोगश्च।

प्र- प्राचार्य:, प्रभवति, प्रकर्ष:, प्रयत्न:, प्रतिष्ठा अप-अपहरति, अपकरोति।

परा- पराजयते, पराभव:, पराभवति।

सम्- संस्करोति, सङ्गच्छते, संस्कृतमद्य, सम्मान:

अनु- अनुगच्छति, अनुकरोति, अनुभव:, अनुरूपम्

निर्- निर्गच्छति, निराकरोति, निर्बल: निर्मक्षिकम्

सु - स्वागतम्, सुपुत्रेण, सुशोभते

आङ्- आगम्य, आगत्य, आगच्छति, आजीवनम्

प्रति- प्रत्युपकार:, प्रत्यवदत्

वि- विजयते, विहरति, विराजते, विहार

# समास:

- समसनम् इति समास:
- समास शब्दस्य समान्यार्थ: भवति - ''संक्षेपण''
- समासस्य भेदा: सन्ति -
  - अव्ययीभाव: समास:
  - तत्पुरुष समास:
  - कर्मधारय समास:
  - द्विगुसमास:
  - द्वन्द्व समास:
  - बहुव्रीहि समास:

**अव्ययी भाव समास :**

- अव्ययीभावसमासे प्रथमपदम् अव्ययं भवति।
- अव्ययप्रधानसमास: ''अव्ययीभावसमास: कथ्यते।''
- समासस्य पदं नपुंसकलिङ्गे प्रयुक्तं भवति।

यथा -

| सामासिकपदम् | समासविग्रह: |
|---|---|
| • समलम् | मलेन सहितम् |
| • उपगङ्गम् | गङ्गाया: समीपम् |
| • प्रतिगृहम् | गृहं गृहं प्रति |
| • अनुरथम् | रथस्य पश्चात् |
| • निर्जनम् | जनानाम् अभाव: |
| • प्रत्येकम् | एकम् एकं प्रति |
| • यथाशक्ति: | शक्तिम् अनतिक्रम्य |
| • निर्विघ्नम् | विघ्नानाम् अभाव: |
| • सचक्रम् | चक्रेण सहितम् |

**तत्पुरुष समास:**

- प्रायेण उत्तरपदार्थ प्रधान: तत्पुरुष: ।
- यत्र पूर्वपदं द्वितीया विभक्ति: सप्तमीविभक्ति: पर्यन्तं भवति एवञ्च उत्तरपदं प्रथमाविभक्तौ भवति तत्र तत्पुरुषसमास:
- पूर्वपदस्य विभक्ति: अनुसारेण समासस्य नामकरणं भवति ।
- यथा ;

| सामासिक पदम् | | समासविग्रह | |
|---|---|---|---|
| • ग्रामगत: | - | ग्रामं गत: | (द्वितीया तत्पुरुष समास:) |
| • शरणागत: | - | शरणम् गत: | (द्वितीया तत्पुरुष समास:) |
| • हरित्रात: | - | हरिणा त्रात: | (तृतीया तत्पुरुष समास:) |
| • ज्ञानशून्य: | - | ज्ञानेन शून्य: | (तृतीया तत्पुरुष समास:) |
| • दीनदानम् | - | दीनाय दानम् | (चतुर्थी तत्पुरुष समास:) |
| • चौरभयम् | - | चौरात् भयम् | (पञ्चमी तत्पुरुष समास:) |
| • सिंहभीत: | - | सिंहात् भीत: | (पञ्चमी तत्पुरुष समास:) |
| • देशभक्त: | - | देशस्य भक्त: | (षष्ठी तत्पुरुष समास:) |
| • राजपुत्र | - | राज्ञ: पुत्र | (षष्ठी तत्पुरुष समास:) |
| • सभापण्डित: | - | सभायां पण्डित: | (सप्तमी तत्पुरुष समास:) |
| • जलमग्न: | - | जलेमग्न: | (सप्तमी तत्पुरुष समास:) |
| • अयोग्य: | - | न योग्य: | (नञ् तत्पुरुष समास:) |
| • अहितम् | - | न हितम् | (नञ् तत्पुरुष समास:) |
| • अनादि/असत्यम् | - | न आदि / न सत्यम् | (नञ् तत्पुरुष समास:) |

**कर्मधारयसमास:**

- स चासौ कर्मधारय: ।
- यत्र प्रथमं पदं विशेषणम् उपमानं वा तथा द्वितीयं पदं विशेष्यम् उपमेयं वा भवति तत्र कर्मधारयसमास: भवति।
  यथा -

| सामासिक पदं | | समास विग्रहः |
|---|---|---|
| • पीताम्बरम् | - | पीतं च तत् अम्बरम् |
| • महापुरुष: | - | महान् च असौ पुरुष: |
| • कज्जलमलिनम् | - | कज्जलम् इव मलिनम् |
| • नीलकमलम् | - | नीलं च तत् कमलम् |
| • मीननयनम् | - | मीन इव नयनम् |
| • मुख कमलम् | - | कमलम् इव मुखम् |
| • महावृक्ष: | - | महान् च असौ वृक्ष: |
| • घनश्याम: | - | घन इव श्याम: |
| • नीलोत्पलम् | - | नीलम् च तत् उत्पलम् |

**द्विगुसमासः**

- संख्यापूर्वो द्विगु:
- यत्र प्रथमपदसङ्ख्यावाची भवति तथा च उत्तरपदस्य विशेषतां ज्ञापयति स: द्विगुसमास: भवति।
- द्विगुसमासे समूहवाचक: अर्थ: भवति।

यथा -

| सामासिकपदम् | | समास विग्रहः |
|---|---|---|
| • पञ्चपात्रम् | - | पञ्चानां पात्राणां समाहार: |
| • पञ्चवटी | - | पञ्चानां वटानां समाहार: |
| • सप्तर्षि: | - | सप्तानाम् ऋषीणां समाहार: |
| • चतुर्युगम् | - | चतुर्णां युगानां समाहार: |
| • अष्टाध्यायी | - | अष्टानाम् अध्यायानां समाहार: |
| • त्रिभुवनम् | - | त्रयाणां भुवनानां समाहार: |

**द्वन्द्वसमासः**

- प्रायेणोभयपदार्थ प्रधानो द्वन्द्व: ।
- यत्र समेषां पदानां प्राधान्यं भवति तत्र द्वन्द्वसमास: ।
- ''चार्थेद्वन्द्व:'' अर्थात् ''च'' इति अस्य अर्थे द्वन्द्वसमास: भवति।

यथा -

| सामासिकपदम् | | समास विग्रहः |
|---|---|---|
| • रामलक्ष्मणौ | - | रामश्च लक्ष्मणश्च |
| • पितरौ / मातापितरौ | - | माता च पिता च |
| • हरिहरौ | - | हरिश्च हरश्च |
| • हेमन्तशिशिरवसन्ताः | - | हेमन्तश्च शिशिरश्च वसन्तश्च |
| • धर्मार्थकायमोक्षाः | - | धर्मश्च, अर्थश्च, कामश्च, मोक्षश्च |
| • वसन्तग्रीष्म शिशिराः | - | वसन्तश्च, ग्रीष्मश्च, शिशिरश्च |
| • पाणि च पादौ च | - | पाणिपादम् |

**बहुव्रीहि समासः**

- प्रायेण अन्यपदार्थ प्रधानो बहुव्रीहिः ।
- यत्र सामासिक पदेभ्यः अन्यस्य बोधः भवति सः बहुव्रीहिः ।
- बहुव्रीहि समासस्य अन्ते यस्य सः अथवा येन इति शब्दः भवति ।

यथा -

| सामासिकपदम् | | समास विग्रहः |
|---|---|---|
| • नीलकण्ठः | - | नीलः कण्ठः यस्य सः |
| • दशाननः | - | दश आननानि यस्य सः |
| • पीताम्बरः | - | पीतम् अम्बरम् यस्य सः |
| • चन्द्रशेखरः | - | चन्द्रः शेखरे यस्य सः |
| • चतुर्मुखः | - | चत्वारि मुखानि यस्य सः |
| • चक्रपाणिः | - | चक्रं पाणौ यस्य सः |
| • महाबाहुः | - | महान्तौ बाहू यस्य सः |

# स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रम्

110 द्वारकानगरम्
सागर:
दिनाङ्क 02/12/2020

प्रियमित्र हितेष:

सप्रेम नमस्कार: ।

इदं ज्ञात्वा प्रसन्नो भविष्यसि यत् भगवत्कृपया मम भगिन्या: विवाह: मासस्य विंशतिङ्के भविष्यति । अहं त्वां सादरं आमन्त्रयामि ।

अत: भवान् सपरिवार: समागत्य विवाहोत्सवे भागं गृह्णातु।

स्वगृहे सर्वेभ्य: मम वन्दनं निवेदय ।

भवदीय: मित्रम्
सुरेश:

दिनांङ्क .................

# प्रत्यया:

- पठित्वा, गत्वा, कृत्वा, श्रुत्वा, दृष्ट्वा इत्यत्र ''क्त्वा'' प्रत्यय: ।
- 'क्त्वा' प्रत्यान्त पदानि-दत्वा, पीत्वा, ज्ञात्वा, हत्वा, खादित्वा च।
- पठितुम्, गन्तुम्, पातुम् हन्तुम्, दातुम् इत्यत्र 'तुमुन्' प्रत्यय: ।
- तुमुन् प्रत्ययान्त पदानि - द्रष्टुम्, हसितुम्, क्रीडितुम्, गातुम् इत्यादया: ।
- पुल्लिंग 'शतृ' प्रत्ययान्त पदानि - पठन्, गच्छन्, भवन्, पश्यन् इत्यादय: ।
- पचन्, पृच्छन्, गायन्, यजन्, खादन् इत्यत्र पु. ''शतृ'' प्रत्यय: ।
- लभमान:, सेवमान:, मोदमान:, वर्तमान:, जायमान: इत्यत्र ''शानच्'' प्रत्यय: ।
- 'शानच्' प्रत्ययान्त पदानि - वर्धमान:, सहमान: कुर्वाण:, ददान: च ।
- गत:, पठित:, भूत:, श्रुत: कृत: इत्यत्र 'क्त' प्रत्यय: ।
- 'क्त' प्रत्ययान्त पदानि - वर्धमान:, सहमान:, कुर्वाण:, दहान: च ।
- गत:, पठित:, भूत:, श्रुत: कृत: इत्यत्र 'क्त' प्रत्यय: ।
- 'क्त' प्रत्ययान्त पदानि - कथित:, पतित:, दृष्ट:, भक्षित: च ।
- पठितवान्, गतवान्, श्रुतवान्, कृतवान्, दृष्टवान इत्यत्र 'क्तवतु' प्रत्यय: ।
- 'क्तवतु' प्रत्ययान्त पदानि - गृहीतवान्, पीतवान्, भक्षितवान् च ।
- गमनीयम्, पठनीयम्, हसनीयम्, लेखनीयम् इत्यत्र ''अनीयर्'' प्रत्यय: ।
- 'अनीयर्', प्रत्ययान्त पदानि - श्रवणीयम्, स्मरणीयम्, दर्शनीयम् च ।
- गन्तव्यम्, पठितव्यम्, हसितव्यम्, दातव्यम् इत्यत्र 'तव्यत्' प्रत्यय: ।
- तव्यत् प्रत्ययान्त पदानि- कर्तव्यम्, द्रष्टव्यम्, रक्षितव्यम् इत्याद: ।
- बालिका, मूषिका, शिक्षिका, नायिका इत्यत्र 'टाप्' प्रत्यय: ।
- 'टाप्' प्रत्ययान्त पदानि - सुता, अश्वा, बाला, वत्सा च ।

# वाच्यपरिवर्तनम्

| कर्मवाच्य | कर्तृवाच्य |
|---|---|
| • छात्रेण हस्यते | छात्र: हसति |
| • तेन पुस्तकं पठ्यते | स: पुस्तकं पठति |
| • त्वया गम्यते | त्वम् गच्छसि |
| • रमया गीतां पठ्यते | रमा गीता पठति |
| • मया मोदकं खाद्यते | अहं मोदकं खादामि |
| • बालकेन विद्यालय: गम्यते | बालक: विद्यालयं गच्छति |
| • तेन रोटिका खाद्ययते | स: रोटिकां खादति |
| • मया गम्यते | अहं गच्छामि |

| कर्तृवाच्य | कर्मवाच्य |
|---|---|
| • राम: गृहं गच्छति | रामेण गृहं गम्यते |
| • रमा फलं खादति | रमया फलं खाद्ययते |
| • अहं पठामि | मया पठ्यते |
| • त्वं विद्यालयं गच्छति | त्वया विद्यालयं: गम्यते |
| • स: रोटिकां खादति | तेन रोटिकां खाद्यते |

**कालिदास:**

मम प्रिय: कवि: कालिदास: अस्ति। कविकुलशिरोमणि: महाकवि: कालिदास: संस्कृतभाषाया: श्रेष्ठतम: कवि: अस्ति। स: नाटककार: महाकाव्यनिर्माता गीतिकाव्यकर्ता (खण्डकाव्यकर्ता) च आसीत्। तस्य प्रमुखा: ग्रन्था: सन्ति यथा -

(अ) त्रीणि नाटकानि-मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च।

(ब) महाकाव्यद्वयम्-रघुवंशम्, कुमारसम्भवम् च।

(स) गीतिकाव्यद्वयम्-मेघदूतम्, ऋतुसंहारम् च।

कालिदास: महाराजविक्रमादित्यस्य सभाकवि: आसीत्। तस्य राजधनी उज्जयिनी आसीत्। मेघदूते उज्जनिन्या: भव्यं वर्णनं विद्यते। कालिदासस्य कृतिषु कृत्रिमताया: अभाव: अस्ति। कालिदासस्य लोकप्रियताया: कारणं तस्य प्रसादगुणयुताललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीवरम्यम् अस्ति। चरित्रचित्रणे कालिदास: अतीव पटु: अस्ति।

कालिदास: उपमाप्रयोगे प्रसिद्ध: अस्ति यथा ''उपमा कालिदासस्य''।

## परोपकारः

परेषां उपकार: परोपकार: कथ्यते। यत्कार्य नि:स्वार्थभावनया क्रियते ततत् एव परोपकार:। संसारे द्विविधा मनुष्या: सन्ति। तेषु केचन् परोपकारिण: सन्ति तु केचन स्वार्थिन: सन्ति। परोपकारिण: सज्जना: भवन्ति। तेषां सम्पूर्ण जीवनं पर-हितार्थ समर्पित भवति। अस्मिन् संसारे न केवलं मनुष्य: अपितु प्रकृतिरपि परोपकारे संलग्ना दृश्यते। वृक्षा: पर हिताय स्व फलानि छायां च यच्छन्तित्र नद्य: परेषां पिपासां शान्तयितुं अनवरतं प्रवहन्ति। मेघा: जलम् वर्षित्वा संसारं हरितं कुर्वन्ति। प्रकृति: निरन्तरं पर-कल्याणरता वर्तते। परं इयम् प्रत्युपकारं कदापि न वाञ्छति। प्रकृते सदृश: परोपकारिण: स्वशरीरपि परोपकारयैव मन्यन्ते। अस्माकं देशे दधीचि:, शिवि: आदय: अनेके महापुरुषा: स्व शरीरं दत्वा अपि परोपकारं अर्कुर्वन्। अत: वयमपि परोपकारिण: भवेम। कथितम् अपि -

अष्टदशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकार: पुण्याय पापाय परपीडनम्॥

## संस्कृतभाषायाः महत्वम्

संस्कृतभाषाया: भारतवर्षे आदिकालादेव मानवानां व्यवहारे प्रयोगो भवति स्म। संस्कृतं विश्वस्य प्राचीनतमा भाषास्ति। श्रद्धावशादियं जनै: देववाणी सुरभारतीत्यपि कथ्यते। इयं भाषा भारतीयाया: सभ्यताया: संस्कृते: चिन्तनस्य च संवाहिकास्ति। संस्कृतं धर्मस्य, दर्शनस्य, राजनीते:, इतिहासस्य, अर्थशास्त्रस्य नीतिशास्त्रस्य च मूलमस्ति।

अस्यां भाषायां भारतीयचिन्तनस्य सर्वे प्रमुखा: ग्रन्था: उपनिबद्धा: सन्ति। विश्वसाहित्यस्य प्राचीनतमानां ग्रन्थानां वेदानामपि भाषा संस्कृतमेवास्ति। सम्पूर्ण वैदिकं वाङ्गयं ज्ञानविज्ञानदृष्ट्या समस्ते जगति निरूपमं विद्यते। अस्यां भाषायां दशर्नग्रन्था: साहित्यग्रन्थास्तु उपनिबद्धा: सन्त्येव सहैव भौतिकविज्ञानस्य रसायनविज्ञानस्य, चिकित्साविज्ञानस्य, वनस्पतिविज्ञानस्य, भाषाविज्ञानस्य, वास्तुविज्ञानस्यापि अनेके मौलिका: ग्रन्था: विद्ययन्ते।

संस्कृतभाषायाम् उपनिबद्धे साहित्ये सत्यस्य, अहिंसाया: राष्ट्रभक्ते:, परस्परं सहयोगस्य, त्यागस्य, विश्वबन्धुत्वस्य, शान्तेश्च भावनानामद्य अजखं स्रोत: प्रवहत् विद्यते। लोककल्याणाय अस्यां भाषायां बहव: आदर्शा: प्रस्तुता: सन्ति, यथा- 'वसुधैव कुटुम्बकम्', 'सर्वे भवन्तु सुखिन:', 'तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद्धनम् इत्याादय:।' एतेषामादर्शानामनुकरणं कृत्वा य: कोऽपि मानव: स्वजीवनम् उन्नतं कर्तुं शक्नोति।

विषयदृष्ट्या भाषासौष्ठवदृष्ट्या च इयं भाषा अन्यासु सर्वासु विश्वभाषासु अतिशेते। आधुनिका: प्रायश: सर्वा: भारतीया: भाषा: संस्कृतभाषाया: एव निर्गता: सन्ति।

संस्कृतसाहित्यमाश्रित्यैव आधुनिकं साहित्यमपि विकसितम्। अत एव इयं भाषा भारतीयभाषाणां जननी सम्पोषिका च कथ्यते। विश्वबन्धुत्वभावनां पोषयितुम्, भारतीयां संस्कृतिमवगन्तुम्, राष्ट्रियताया: भावनां वर्धयितुम् भारतीयभाषाणां विकासाय च संस्कृतभाषाया: परमोपयोगिता विद्यते।

# पत्र-लेखनम्

## ''अवकाशार्थं प्रार्थनापत्रम्''

सेवायाम्

श्रीमन्त: प्राचार्यमहोदया:

शा. कन्या उ.मा.वि. गौहरगंजम्

मध्यप्रदेश: ।

विषय:- अवकाशार्थं प्रार्थनापत्रम् ।

महोदया:,

सविनयं निवेदनम् अस्ति यद् अहम् अद्य सहसा शिरोवेदनया पीडित: अस्मि । एतस्मातद्य कारणात् विद्यालयम् आगन्तुम् असमर्थ: अस्मि ।

अत: महोदया: दिनद्वयस्य अवकाशं स्वीकुर्न्वन्तु ।

'धन्यवादा:'

भवदीया शिष्या

अनुष्का वर्मा

कक्षा दशमी अ वर्ग:

दिनांङ्क .................

20 / 10 / 2024